ल्विलो भविष्यतीति विद्यात्" शत०ब्रा० ४,५,८,११,

**इभ्या** स्त्री इभमर्हति सेव्यत्वेन दण्डा० यत्। १हस्तिन्यां २शल्लकीवृक्षे च मेदि०।

**इमथा** अव्य० इदम्–इवार्थे–थाल् "प्रत्नपूर्वविश्वेमात् थाल् छन्दसि" पा० सू० निर्देशात् नि० इमादेशः। इदानीन्तनतुल्ये। "तं प्रत्नथा पूर्वथा विश्वथेमथा इव ज्येष्ठतातिं वर्हिषदं स्वर्विदम्" ऋ० ५,४४,१। "प्रत्नथा पुरातनयजमाना इव पूर्वथास्मदीया पूर्वे यथा। विश्वथा विश्वे सर्वे प्राणिनो यथा। इमथा इदानीं वर्त्तमाना यजमाना इव" भा० "इयत्तक्" यजु०७अ०११च पठिता।

**इयक्षु** त्रि० यज+सन उ वेदे नि संप्रसारणम्। यष्टुमिच्छौ "धन्वन्निव प्रपा असि त्वमग्न इयक्षवे" ऋ०१०,४,१, वेदे प्रायेण सर्वत्र नि० संप्रसा०। "सुम्नं वां सूरिरिष्टं षणावियक्षन्" १,१५२,२, देवानां इयक्षनो यजमान इयक्षति" ऋ०८, ३१,११५,

**इयत्** त्रि० इदं परिमाणमस्य इदम्–वतुप्। एतावदर्थे "नीतं यदि नवनीतं कियदिति यशोदया पृष्टः। इयदिति गुरुजनसविधे विधृतघननिष्ठापयोधरः पायात्" उद्भटः। "इयान् वाव किल पशुर्यावती वपा" ऐत० "इयन्ति वर्षाणि तया सहोग्रम्" रघुः "दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्" सा० द०। अत्र साधनप्रकारः इदम्+परिमाणार्थे वतुप् वस्य घः इदम इश् "यस्येति" पा० प्रकृतीकारलोपे प्रत्ययमात्रस्थितिः। अतएवात्र वैयाकरणा औपनिषदाश्च पठन्ति। "उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ गतवति विलयञ्च प्राकृतेऽपि प्रपञ्चे। सपदि पदमुदीतं केवलं प्रत्ययोत्थं तदियदिति मिमीते कोवृदा पण्डितोऽपि"। स्त्रियां ङीप्।

**इयत्तका** स्त्री कुत्सिता इयत्ता कुत्सितार्थे कन् ह्रस्वः। कुत्सितेयत्तायाम्। ततः अर्श आ० अस्त्यर्थे अच्। कुत्सितेयत्तायुते अल्पप्रमाणे "इयत्तकं कुषुम्भकस्तकं भिनद्म्यश्मना" ऋ० १,१९१,१५,

**इयत्ता** स्त्री इयतो भावः तल्। १सीमायां, २परिमाणे, ३संख्यायाञ्च। "न गुणानामियत्तया" "यशः परिच्छेत्तुमियत्तयालम्" "ईदृक्तया रूपमियत्तया वा" इति च रघुः।

**इयस्** त्रि० इ–कर्त्तरि असुन् किच्च। १गन्तरि भावे असुन्। २गतौ 'तेषां हैयसेवास किमिह कर्त्तव्यम्" शत०ब्रा०२,२,३,२,

**इर्–**ईर्षायां कण्ड्वा०यक् उभ०। इर्यति इर्य्यते।

**इरज्–**ईर्षायां कण्ड्वादि०यक् प०। इरज्यति। "इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायः" ऋ०१०,१४०,४। "इरज्यन्त यच्छुरुधोविवाचि" ऋ०७,२३,२, यदेषामग्नं जगतामिरज्यसि" ऋ०१०,७५,२। "युवं विप्रस्य मन्मनामिरज्यथः" ऋ०१,१५१,६।

**इरण** त्रि० ईरिण+पृ०। ऊषरभूमौ अमरटीका रमा०।

**इरम्मद** पु० इरया जलेन अन्नेन वा माद्यति वर्द्धते इरा–मद–खच् नि० ह्रस्वः मुम् च। १वज्राग्नौ २वाड़वानले च। "इरम्मदं बृहदुक्थं यदत्त" यजु०११,७४।
"इरया अन्नेन माद्यति उग्रं पश्येत्यादि" पा०नि० "वेद-दी०। "बृहते हवामहे इत्येतदिरम्मदमितीरया ह्येष मत्तः" शत०ब्रा०६,६,२,४।

**इरस्** इरज्वत् कण्ड्वा०इरस्यति "मात्रपूषन्नाघृण इरस्यः" ऋ०७,४०,६। "यस्मा इरस्यसीदम्" ऋ०१०,८६,२।

**इरा** स्त्री इण्–रक् इं कामं राति रा–क वा। १भूमौ, २वाचि, ३सुरायाम्, ४जले, ५अन्ने च। "इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवी रेतसावतिः" ऋ० ५,८३,१। "इरामस्मा ओदनं पिन्वमानाः" शत०ब्रा०६,६,२२। ६कश्यपस्य पत्नीभेदे। "धर्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम्। अदितिर्दितिर्दनुःकाला अमायुः सिंहिका मुनिः। कद्रूः प्राधा इरा क्रोधा विनता सुरभिःखशा" इत्युपक्रम्य "इरा वृक्षलतावल्लीतृणजातीश्च सर्वशः" असूतेति शेषः। गरुडपु०।

**इराक्षीर** पु० इरा जलं क्षीरमिवास्य। क्षीरसमुद्रे।

**इराचर** न० इरायां जले भूमौ वा चरति चर–ट ६त०। १वर्षोपले त्रिका० २भूचरे ३जलचरे च त्रि० स्त्रियां ङीप्।

**इराज** पु० इरा सुरेव अजति विक्षिपति अज–अच् न वी भावः। कन्दर्पे हला०। [ त्रिका०।

**इराम्बर** न० इरा जलमम्वरमिव यस्य। वर्षोपले करकायाम्।

**इरावत्** इरा+भूम्नि मतुप् मस्य वः। समुद्रे तत्र भवः अण् ऐरावतः। अर्जुनेन नागकन्यायामुत्पादिते २वीरभेदे तदुत्पत्तिकथा" भा०भी० ९१अ०।
"अर्जुनस्यात्मजः श्रीमानिरावान्नाम वीर्य्यवान्। स्नुषायां नागराजस्य जातः पार्थेन धीमता। ऐरावतेन सा दत्ता ह्यनपत्या महात्मना। पत्यौ हते सुपर्णेन कृपणा दीनचेतना। भार्य्यार्थं ताञ्च जग्राह पार्थः कामवशानुगाम्। एवमेष समुत्पन्नः परक्षेत्रेऽर्जुनात्मजः। स नागलोके संवृद्धो मात्रा च परिरक्षितः। पितृव्येण